दम्भः २। इति हेमचन्द्रः॥ (शाठ्यरहितः। सरलः।)
अकल्वाल इत्यपि पाठः।

अकल्का, स्त्री, (नास्ति कल्कः अन्धकारमालिन्यं यस्याम् इति।) ज्योत्स्ना। इति शब्दचन्द्रिका॥ वाच्यलिङ्गस्तु कल्करहिते॥ (शाठ्यशून्यः। दम्भशून्यः। सरलः। निर्म्मलः।)

अकल्पितः, त्रि, (न कल्पित इति। नञ्समासः।) कल्पनारहितः। अकाल्पनिकः। अकृत्रिमः। अरचितः। (सत्यः। प्रकृतः। अवितथः।)

अकल्यः, त्रि, (न कल्यः सुस्थः। नञ्समासः।) रोगी॥ (यथा,—

"अकल्यबालस्थविरविषमस्थक्रियाकुलान्।
... ... ... नाक्रापयेन्नृपः"॥

इति मिताक्षराधृतवचनम्॥ असमर्थः। यथा,—

"अकल्यः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे"।

इति भागवते।) कल्यो निरामयः तत्र नञ्समासः॥

अकल्याणं, क्ली, (न कल्याणं। नञ्समासः।) अमङ्गलं। अशुभं॥ (त्रि। कल्याणरहितः।)

अकस्मात्, व्य, अतर्कितं। हठात् १। तत्पर्य्यायः। सहसा २ सद्यः ३ सपदि ४ तत्क्षणे ५ एकपदे ६। इति हेमचन्द्रः॥ नञ्समस्तकिमृशब्दस्य पञ्चम्यन्तप्रयोगोऽयं। इति केचित्॥

अकारणं, त्रि, (नास्ति कारणं यस्य सः। न+कारणं।) कारणशून्यं। निर्हेतु। अनिमित्तं। यथा,—

"कुतः पुनः शश्वदभद्रमीश्वरे,
न चार्पितं कर्म्म यदप्यकारणम्"।

इति श्रीभागवतं॥ (कारणं विना। कारणाभावः। यथा,—"कारणसामान्ये द्रव्यकर्म्मणां कर्म्माकारणमुक्तम्"। इति वैशेषिकसूत्रम्।)

अकारणगुणोत्पन्नगुणः, पुं, (विना कारणगुणं उत्पन्ना जाताः ये गुणाः। अकारणगुण+उत्पन्न+गुण।) स्वाभाविकगुणः। न्यायमते विभुनिष्ठविशेषगुणाः यथा,—बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावना ९ शब्दः १०।

("अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः"॥

इति भाषापरिच्छेदे। अकारणेति कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते। बुद्ध्यादयस्तु न तादृशाः। आत्मादेः कारणाभावात्।) इति सिद्धान्तमुक्तावली॥

अकार्पण्यं, क्ली, (न कार्पण्यम्। नञ्समासः।) कृपणतारहित्यं। यथा,—

"स्तोकादपि च दातव्यमदीनेनैव चात्मना।
अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत् स्मृतम्"॥

इत्येकादशीतत्त्वम्॥

अकार्य्यं, क्ली, (न कार्य्यम्। नञ्समासः।) कार्य्याभावः। अकृत्यं। अकर्म्म। (दुष्कर्म्म। कुकार्य्यम्।) यथा,—

किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनां"।

इति श्रीभागवतं॥

अकालः, पुं, (न कालः, अप्रशस्तः कालो वा। नञ्समासः।) असमयः। अप्रशस्तकालः। यथायोग्यकालातिरिक्तसमयः। अशुद्धकालः। यथा,—गुरोरस्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्यास्ते द्वात्रिंशद्दिनं। तस्योदयात् परं बालत्वे पञ्चदशाहः। गुर्व्वादित्ययोगे स्थितिकालः दशत्रिंशद्दिनादिः।

सिंहे गुरोः स्थितिकालः सम्वत्सरस्थूलः। अस्य विशेषः यदि माघपौर्णमास्यां मघानक्षत्रं प्राप्यते तदैवं भाव्यं। वक्रिगुरौ अष्टाविंशतिदिनं। पूर्व्वराशावनागतातिचारिगुरौ एकवर्षः। अयमेव लुप्तसम्वत्सरः। पूर्व्वराशिगन्तातिचारिगुरौ पञ्चचत्वारिंशत् दिनं। नीचस्थगुरोः स्थितिकालः संवत्सरस्थूलः। राहुयुक्तगुरोः स्थितिसमयः एकाब्दः स्थूलः। भृगोर्मृगास्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्य मध्यास्ते दिवसत्रितिदिनं। तस्योदयात् परं बालत्वे दशाहः। एतत्त्रयं शौक्रास्तमुच्यते॥ भृगोः पादास्तात् प्राक् वृद्धत्वे दशाहः। तस्य पादास्ते द्वादशाहः। तस्योदयात् परं बालत्वे दिनत्रयं। एतत्त्रयं वक्रास्तमुदितं। मलमासे मासमेकं॥ भानुलङ्घितमासे क्षयमासे च तदेव॥ भूकम्पाद्यद्भुते सप्ताहः॥ पौषादिचतुर्मासे एकदिनचरणाङ्कितवर्षणे तद्दिनं। दिनद्वयचरणाङ्कितवर्षणे दिनत्रयं। दिनत्रयचरणाङ्कितवर्षणे सप्ताहः॥ दक्षिणायने षण्मासाः॥ श्रीहरिशयने चतुर्मासः॥ चन्द्रसूर्य्यग्रहणे कर्म्मविशेषे एकत्रिसप्तदिनानि॥ इति ज्योतिषतत्त्वं॥

अकालजः, त्रि, (अकाले जायते इति। अकाल+जन+ड। अकालजातः। असमयोत्पन्नः। अपूर्णकालोद्भवः। यथा,—

"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतं"॥

इति राजवल्लभः॥

अकालजलदोदयः, पुं, कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥ यथा रघुवंशे—

"यवनीमुखपद्मानां सेहे मधमदं न सः।
बालातपमिवाब्जानामकालजलदोदयः"॥

अकालमेघोदयः, पुं, (अकाले यः मेघानाम् उदयः।) कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥

अकिञ्चनः, त्रि, (नास्ति किञ्चन यस्य। मयूरव्यंसकादित्वात् बहुव्रीहिसमासः।) दरिद्रः। नास्ति किञ्चिदपि यस्य। इति हेमचन्द्रः॥ (यथा,—'अकिञ्चनः सन् प्रभवः स सम्पदाम्' इति कुमारसम्भवे।)

अकिञ्चनता, स्त्री, (अकिञ्चनस्य भावः। अकिञ्चन+तल्।) अकिञ्चनस्य भावः। सा तु परिग्रहत्यागरूपयमविशेषः। इति हेमचन्द्रः॥

अकिल्विषः, त्रि, (नास्ति किल्विषं यस्य। बहुव्रीहिः।) किल्विषशून्यः पापरहितः। यथा,—

"न मां दोषेण सुग्रीव गन्तुमर्हस्यकिल्विषं"।

इति रामायणं॥

अकीर्त्तिः, स्त्री, (न कीर्त्तिः। नञ्समासः।) अयशः। यथा,—

"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते"॥

इति श्रीभगवद्गीतायां २ अध्याये ३४ श्लोकः॥

अकीर्त्तिकरं, त्रि, (अकीर्त्तिं करोति जनयति इति। यद्वा कीर्त्तिकरं न भवतीति नञ्समासः।) अयशस्करं। यथा,—

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन"॥

इति श्रीभगवद्गीतायां २ अध्याये २ श्लोकः॥

अकुतोभयः, त्रि, (नास्ति कुतोऽपि भयं यस्य सः। मयूरव्यंसकादिगणान्तर्गतः। न+कुतः+भयं।) नास्ति कस्माद्भयं यस्य। निर्भयः। यथा। इच्छतामकुतोभयमिति भक्तिरसामृतसिन्धुः॥

अकुप्यं, क्ली, (न कुप्यं, कुप्यादन्यदित्यर्थः। नञ्समासः।) स्वर्णं। रूप्यं इति हलायुधः॥ यथा—कुरूनकुप्यं वसु वासवोपमः'। इति भारविः)॥

अकूपारः, पुं, (न कूपारः। नञ्समासः। कुं पृथिवीं पिपर्त्ति इति कूपारः। पृ पालनपूरणयोः। कर्म्मणि अण्। अन्येषामपीति दीर्घः।) समुद्रः। इत्यमरः॥ कूर्म्मराजः। पाषाणादिः। इति मेदिनी॥ कमठः। इति त्रिकाण्डशेषः॥

अकूर्चः, पुं, (नास्ति कूर्चः कैतवं यस्य। बहुव्रीहिः।) बुद्धः। इति त्रिकाण्डशेषः। कैतवशून्ये त्रि। (दम्भशून्ये)।

अकृतं, त्रि, (न+कृ+क्त।) न कृतं। अनिष्पादितं। यथा,—

"कालातीतन्तु यत् कुर्य्यादकृतन्तद्विनिर्द्दिशेत्"

इति स्मृतिः॥ (नियः। प्रमाणाविषयः। (क्ली) मोक्षः। कार्य्यं। (स्त्री) प्रकृतिविशेषः। यथा—"अयं निम्नदेशगमनादिलक्षणा प्रकृतिः सा न केनचित्कृता"।)

अकृतज्ञः, त्रि, (न+कृत+ज्ञा+क। न कृतज्ञः इति नञ्समासः।) कृतघ्नः। हितानभिज्ञः। उपकारामानी। उपकारहन्ता। यथा,—

"भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः।
आत्मारामाः पूर्णकामा अकृतज्ञा गुरुद्रुहः"॥

इति श्रीभागवतं॥

अकृतित्वं, क्ली, (अ+कृतिन्+त्व।) अदक्षता। अपटुता। कर्म्माकुशलत्वं। अयोग्यत्वं॥

अकृती, [न्] त्रि, (न+कृती। नञ्समासः।) कर्म्माक्षमः। कार्य्याकुशलः। क्रियानुपयुक्तः।

अकृत्रिमं, त्रि, (करणात् जातः कृत्रिमः। स न भवतीति नञ्समासः।) अकरणजं। अजन्यं। सिद्धं। अकरणजातं। यथा दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"॥

इत्याह्निकाचारतत्त्वं॥ ०॥ किञ्च। कात्यायनः।

"पूर्व्वपदं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।